अलीकवचनं मिथ्याकथनं अटनं पृथ्वीपरिभ्रमणम् ॥ अथ तमोगुणयुक्तस्य मनसो गुणा यथा,—

"नास्तिक्यं सुविषस्नतातिशयितालस्यञ्च दुष्टा मतिः
प्रीतिर्निन्दितकर्म्मशर्म्मणि सदा निद्रालुताहर्निशम् ।
अज्ञानं किल सर्व्वतोऽपि सततं क्रोधान्धता मूढ़ता
प्रख्याता हि तमोगुणेन सहितस्यैते गुणाश्चेतसः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥*॥ सर्व्वे सान्ता अदन्ताश्चेति प्रमाणात् अकारान्तमनशब्दोऽप्यस्ति । यथा, उत्तरगीतायाम् । १३ अध्याये ।

"मनस्थं मनमध्यस्थं मध्यस्थं मनवर्ज्जितम् ।
मनसा मनमालोक्य स्वयं सिद्ध्यन्ति योगिनः ॥")

मनःशिलः, पुं, ( मनो मानसं शिलति आकर्षति स्वगन्धेनेति । शिल + कः ।) मनःशिला । यथा,
"टङ्कैर्मनःशिलगुहैरविदार्य्यमाणा ॥"
इत्यमरटीकायां भरतः ॥

मनःशिला, स्त्री, (मनः शिलति आददाति आकर्षति गन्धेनेति । शिल + कः । स्त्रियां टाप् । यद्वा, मनःप्रसादिका शिला धातुविशेषः । ) रक्तवर्णधातुविशेषः । मन्छल इति भाषा ॥ ( यथा, कुमारे । १ । ५५ ।
"मनःशिलाविच्छुरिता निषेदुः
शैलेयनद्धेषु शिलातलेषु ॥")
सा तु लक्ष्मीवीर्य्यम् । इति वैद्यकम् ॥ तत्पर्य्यायः । कुनटी२ मनोह्वा३ नागजिह्विका ४ । इत्यमरः । २ । ६ । १०८ ॥ नैपाली ५ शिला ६ । इति रत्नमाला ॥ मनोज्ञा ७ नेपालिका ८ मनोगुप्ता ६ कल्याणिका १० रोगशिला ११ । इति राजनिर्घण्टः ॥ गोला १२ दिव्यौषधिः १३ । इति भावप्रकाशः ॥ अस्या गुणाः । कटुत्वम् । स्निग्धत्वम् । लेखनत्वम् । विषभूतावेशभयोन्मादनाशित्वम् । वश्यकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च । तिक्तत्वम् । कफनाशित्वम् । सारकत्वम् । रुहिंकारित्वम् । कुष्ठज्वरपाण्डुकासश्वासनाशित्वम् । शुक्रमङ्गलकारित्वञ्च । इति राजवल्लभः ॥ अन्यच्च ।
"मनःशिला गुरुर्व्वर्ण्या सरोष्णा लेखनी कटुः ।
तिक्ता स्निग्धा विषश्वासकासभूतकफास्रनुत् ॥
मनःशिला मन्दबलं करोति
जन्तुं ध्रुवं शोधनमन्तरेण ।
मलानुबन्धं किल मूत्ररोधं
सशर्करं कृच्छ्रगदञ्च कुर्य्यात् ॥"
इति भावप्रकाशः ॥
( अस्याः पर्य्यायः शोधनं गुणाश्च यथा,—
"मनःशिला च नेपाली शिलाह्वा नागजिह्विका ।
मनोज्ञा कुनटी गोली करञ्जी करवीरिका ॥
मनोज्ञा श्वोड्रपुष्पाभा शस्यते सर्व्वकर्म्मसु ॥"
"जयन्ती भृङ्गराजोत्थै रक्तागस्त्यरसैः शिला ॥
दोलायन्त्रे दिनं पाच्या यामं छागस्य मूत्रके ।
क्षालयेदारनालेन सर्व्वरोगेषु योजयेत् ॥"
मतान्तरे मनःशिलाशुद्धिर्यथा,—
"अगस्त्यपत्रतोयेन भाविता सप्तवासरम् ।
शृङ्गवेररसैर्वापि विशुध्यति मनःशिला ।
कटुः स्निग्धा शिला तिक्ता कफघ्नी लेखनी सरा ।
भूतावेशभयं हन्ति कासश्वासहरा शुभा ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

मननं, क्ली, (मन्यत इति । मन् + ल्युट् ।) श्रुतस्याद्वितीयवस्तुनो वेदान्तार्थानुगुणयुक्तिभिः अनवरतमनुचिन्तनम् । इति वेदान्तसारः ॥ बोधनम् । ( यथा, गायत्रीतन्त्रे । १ । ४ ।
"मननात् पापतस्त्राति मननात् स्वर्गमश्नुते ।
मननात् मोक्षमाप्नोति चतुर्व्वर्गमयो भवेत् ॥")
धारणम् । इति मनधात्वर्थदर्शनात् । बुद्धिः । इति राजनिर्घण्टः ॥

मनसा, स्त्री, ( मनः भक्ताभीष्टपूरणाय मननं अस्त्यस्या इति । मनस् + अर्श आदित्वादच् । ततष्टाप् । यद्वा, मनं मननमहङ्कारमिति यावत् स्यति नाशयतीति । सो + कः । ) देवीविशेषः । तत्पर्य्यायः । कद्रुः २ मनसादेवी ३ विषहरी ४ । इति जटाधरः ॥ अस्याः प्रणाममन्त्रः ।
"आस्तीकस्य मुनेर्माता भगिनी वासुकेस्तथा ।
जरत्कारुमुनेः पत्नी मनसादेवि ! नमोऽस्तु ते ॥"
इति तस्याः पूजापद्धतिः ॥
तस्या नाम्नो व्युत्पत्तिर्यथा,—
श्रीनारायण उवाच ।
"श्रूयतां मनसाख्यानं यत् श्रुतं धर्म्मवक्त्रतः ।
कन्या सा च भगवती कश्यपस्य च मानसी ॥
तेनेयं मनसादेवी मनसा या च दीव्यति ।
मनसा ध्यायते या वा परमात्मानमीश्वरी ॥
तेन सा मनसादेवी योगेन तेन दीव्यति ।
आत्मारामा च सा देवी वैष्णवी सिद्धयोगिनी ॥
त्रियुगञ्च तपस्तप्त्वा कृष्णस्य परमात्मनः ।
जरत्कारुशरीरञ्च दृष्ट्वा यत् क्षीणमीश्वरः ॥
गोपीपतिर्नाम चक्रे जरत्कारुरिति प्रभुः ।
वाञ्छितञ्च ददौ तस्यै कृपया च कृपानिधिः ॥
पूजाञ्च कारयामास चकार च पुनः पुनः ।
स्वर्गे च नागलोके च पृथिव्यां ब्रह्मलोकतः ॥
भृशं जगत्सु गौरी सा सुन्दरी च मनोहरा ।
जगद्गौरीति विख्याता तेन सा पूजिता सती ॥
शिवशिष्या च सा देवी तेन शैवीति कीर्त्तिता ।
विष्णुभक्तातीव शश्वद्वैष्णवी तेन नारद ! ॥
नागानां प्राणरक्षित्री यज्ञे जन्मेजयस्य च ।
नागेश्वरीति विख्याता सा नागभगिनीति च ॥
विषं संहर्त्तुमीशा सा तेन विषहरीति सा ।
सिद्धं योगं हरात् प्राप तेनातिसिद्धयोगिनी ।
महाज्ञानञ्च गोप्यञ्च मृतसञ्जीवनीं पराम् ।
महाज्ञानयुतां ताञ्च प्रवदन्ति मनीषिणः ॥
आस्तीकस्य मुनीन्द्रस्य माता सा च तपस्विनः ॥
आस्तीकमाता विख्याता जगत्सु सुप्रतिष्ठिता ॥
प्रिया मुनेर्जरत्कारोर्मुनीन्द्रस्य महात्मनः ।
योगिनो विश्वपूज्यस्य जरत्कारुप्रिया ततः ॥
जरत्कारुर्जगद्गौरी मनसा सिद्धयोगिनी ।
वैष्णवी नागभगिनी शैवी नागेश्वरी तथा ॥
जरत्कारुप्रियास्तीकमाता विषहरीति च ।
महाज्ञानयुता चैव सा देवी विश्वपूजिता ॥
द्वादशैतानि नामानि पूजाकाले च यः पठेत् ।
तस्य नागभयं नास्ति तस्य वंशोद्भवस्य च ॥
नागभीते च शयने नागग्रस्ते च मन्दिरे ।
नागक्षते महादुर्गे नागवेष्टितविग्रहे ।
इदं स्तोत्रं पठित्वा तु मुच्यते नात्र संशयः ।
नित्यं पठेद् यस्तं दृष्ट्वा नागवर्गः पलायते ॥
दशलक्षजपेनैव स्तोत्रसिद्धिर्भवेन्नृणाम् ।
स्तोत्रसिद्धिर्भवेद्यस्य स विषं भोक्तुमीश्वरः ॥
नागौघभूषणं कृत्वा स भवेन्नागवाहनः ।
नागासनो नागतल्पो महासिद्धोभवेन्नरः ॥"
इति ब्रह्मवैवर्त्ते महापुराणे प्रकृतिखण्डे नारायणनारदीये मनसोपाख्याने मनसास्तोत्रं नाम पञ्चचत्वारिंशत्तमोऽध्यायः ॥ * ॥ तस्याः पूजामन्त्रादि यथा,—
श्रीनारायण उवाच ।
"पूजाविधानं स्तोत्रञ्च श्रूयतां मुनिपुङ्गव ! ।
ध्यानञ्च सामवेदोक्तं देवीपूजाविधानकम् ॥
श्वेतचम्पकवर्णाभां रत्नभूषणभूषिताम् ।
वह्निशुद्धांशुकाधानां नागयज्ञोपवीतिनीम् ॥
महाज्ञानयुताञ्चैव प्रवरां ज्ञानिनां सतीम् ।
सिद्धाधिष्ठातृदेवीञ्च सिद्धां सिद्धिप्रदां भजे ॥
इति ध्यात्वा तु तां देवीं मूलेनैव प्रपूजयेत् ।
नैवेद्यैर्विविधैर्दीपैः पुष्पधूपानुलेपनैः ॥
मूलमन्त्रश्च वेदोक्तो भक्तानां वाञ्छितप्रदः ।
मुने ! कल्पतरुर्नाम सुसिद्धो द्वादशाक्षरः ॥
ॐ ह्रीं श्रीं क्लीं ऐं मनसादेव्यै स्वाहेति कीर्त्तितः ।
पञ्चलक्षजपेनैव मन्त्रसिद्धिर्भवेन्नृणाम् ॥
मन्त्रसिद्धिर्भवेद्यस्य स सिद्धो जगतीतले ।
सुधासमं विषं तस्य धन्वन्तरिसमो भवेत् ॥
ब्रह्मन्नाषाढ़संक्रान्त्यां गूढ़शाखासु यत्नतः ।
आवाह्य देवीमीशान्तां पूजयेद् यो हि भक्तितः ॥
पञ्चम्यां मनसाख्यायां देव्यै दद्याच्च यो बलिम् ।
धनवान् पुत्त्रवांश्चैव कीर्त्तिमांश्च भवेद्ध्रुवम् ॥
पूजाविधानं कथितं तदाख्यानं निशामय ।
कथयामि महाभाग ! यत् श्रुतं धर्म्मवक्त्रतः ॥"
तस्या जन्मकारणं यथा,—
"पुरा नागभयाक्रान्ता बभूवुर्मानवा भुवि ।
यान् यान् खादन्ति नागाश्च ते न जीवन्ति नारद ! ॥
मन्त्रांश्च सस्रजे भीतः कश्यपः ब्रह्मणार्थितः ।
वेदबीजानुसारेण चोपदेशेन ब्रह्मणः ॥